# त्रिभाष्यरत्नम्

भक्तियुक्तः प्रणम्याहं गणेशचरणद्वयम्
गुरूनपि गिरं देवीमिदं वक्ष्यामि लक्षणम्
व्याख्यानम्प्रातिशाख्यस्य वीक्ष्य वाररुचादिकम्
कृतं त्रिभाष्यरत्नं यद्भासते भूसुरप्रियम्
श्लोकयोरनयोरयमर्थः । भक्तियुक्तोऽहं गणेशचरणद्वयं
गुरून् गिरमपि देवीम् । वाग्देवीमित्यर्थः ।
तां च प्रणम्य लक्षणमिदं वक्ष्यामि यल्लक्षणं
त्रिभाष्यरत्ननामकम्भूसुरप्रियं विद्वत्प्रियम्भासते ।
कीदृशं लक्षणम् । प्रातिशाख्यस्य व्याख्यानरूपकं
वाररुचादिकम्भाष्यजातं वाक्ष्य न्यूनातिरेकपरिहारेण कृतं
विरचितं । आदिशब्देनात्रेयमाहिषेयौ गृह्येते । अत
एव त्रिभाष्यरत्नमिति नाम्नौपपत्तिः । त्रयाणाम्भाष्याणां
समाहारस्त्रिभाष्यम् । तस्य रत्नम्भूषनम्
अथ वर्णसमाम्नायः १
मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथेऽति मङ्गलाद्यनेकार्थ
त्वादथशब्दस्यार्थनिर्णयार्थमेकोऽर्थो निश्चेतव्यः तत्र प्रथमं
तावन्मङ्गलार्थत्वमुच्यते । तस्य प्रणवसाधर्म्यात् ।
तथा हि समाचक्षते शिक्षाकाराः ।

अन्तिमाः श्लोकाः
पदानां क्रमः पदक्रमः । तस्य विशेषः । तं जानातीति
पदक्रमविशेषज्ञः । वर्णानां क्रमो वर्णक्रमः ।
तस्मिन्विचक्षणो निपुणो वर्णक्रमविचक्षणः । स्वराश्च
मात्राश्च स्वरमात्राः । तासां विभागः तं जानातीति

स्वरमात्राविभागज्ञः । मात्राशब्देन कालविशेषः कश्चिदुच्यते । सोऽपि चतुरणुरित्यादिषु । एवंविधः पुरुष आचार्यसंसदं गछेत् । आचार्या व्यासादयः । तेषाम्ब्रह्मलोके स्थानम् । यश्चेऽदं शास्त्रं जानीते सोऽप्याचार्यत्वात्तेषां सदृशं ब्रह्मलोकं गच्छति ।

तथा च पौराणिका भणन्ति । गारुडपुराणे ।

आहुः समस्तविद्यानां वेदविद्यामनुत्तमाम् ।
अतस्तद्दातुरस्त्येव लाभः स्वर्गापवर्गयोः ।
विद्यानाम्परमा विद्या ब्रह्मविद्या समीरिता ।
अतस्तद्दानशीलश्च सर्वं दानफलं लभेत् ।

देवीपुराणे ।

वेद एव द्विजातीनां साधनं यशसः फलम् ।
अतो स्वाध्ययनाभ्यासात् परम्ब्रह्माधिगच्छति ।
तमेव शीलयेत् प्राज्ञः शिष्येभ्यस्तम्प्रदापयेत् ।
तदभ्यासप्रदानाभ्यामेतत्किंनाधिगच्छति

तथा च याज्ञवल्क्यः ।

यज्ञानां तपसां चैव शुभानां चैव कर्मनाम् ।
वेद एव द्विजातीनां निःश्रेयसकरः परः ।
योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः

महाभारते ।

यो ब्रूयाच्चापि शिष्येभ्यो धर्म्याम्ब्राह्मीं सरस्वतीम् ।
पृथिवीगोप्रदानाभ्यां स तुल्यफलमश्नुते ।

विष्णुधर्मोत्तरेऽपि ।

वेददानादवाप्नोति सर्वं यज्ञफलं नरः ।
उपवेदप्रदानेन गन्धर्वैः सह मोदते ।
ब्रह्मपुराणेऽपि ।
न तत् कल्पसहस्रेण गदितुं शक्यते फलम् ।
यद्वेददानादाप्नोति स्वल्पादपि महामते ।
भविष्यत्पुराणेऽपि ।
अपुत्रो लभते पुत्रानधनो धनवान्भवेत् ।
सदाध्ययनयुक्तस्तु परे ब्रह्मणि लीयते ।
वेदस्वरूपमुच्यते
यजुर्वेदः पिङ्गलाक्षः कृशमध्यो बृहद्गलः ।
बृहत्कपोलः कृष्णाङ्घ्रिस्ताम्रः कश्यपगोत्रजः ।
वेदाङ्गान्युच्यन्ते ।
शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ।
छन्दसां लक्षणं चेति षडङ्गानि विदुर्बुधाः ।
अनुपदं चानुपदं छन्दोभाषासमन्वितम् ।
मीमांसान्यायतर्कं च उपाङ्गानि विदुर्बुधाः ।
एवं साङ्गोपाङ्गवेदस्य लक्षणं सम्पूर्णम् ।

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे चतुर्विंशोऽध्यायः ।

इति द्वितीयप्रश्नः समाप्तः

## Reference:

Whitney, William D., *The Taittirīya Prātiśākhya With its Commentary the Tribhāṣyaratna:* Text, Translation and Notes, Motilal Banarsidass: Delhi, 1973.